# Vajravilasini Stotram

# વજ્રવિલાસિનીસ્તોત્રમ્

## Document Information

Text title : Vajravilasini Stotram

File name : vajravilAsinIstotram.itx

Category : devii, devI, buddha, stotra

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# વજ્રવિલાસિનીસ્તોત્રમ્

ૐ નમઃ શ્રીવજ્રયોગિન્યૈ ।

દેવાસુરનરવન્દિતચરણે ભવમગ્નોદ્ધરણાર્પિતચરણે ।
ત્વયિ રોદિમિ નુતિસવ્યપદેશઃ કિં પશ્યસિ પુનરનિશમશેષમ્ ॥ ૧॥

માતર્દેવિ કિરસિ કણમુષ્ટિં જનયદ્ યજ્ઞસુતઃ કિમતુષ્ટિમ્ ।
વજ્રવારાહિ નરાહિસુરાણાં ત્વં શરણં તવ નામપરાણામ્ ॥ ૨॥

હરિકર(રિ)શિખિફણિતસ્કરભીતિસ્ત્વત્પરચિત્તે નૈવ સમેતિ ।
માતર્દેવિ નિભાલય મહ્યં કિં સહસે મમ દુઃખમસહ્યમ્ ॥ ૩॥

તર્જનવજ્રકરોટ(વિ)ધારિણિ દુષ્ટં તુષ્ટય મારનિવારિણિ ।
અભિનવકોમલકરચરણાઙ્ગિ ત્રિવલિસમુચ્છદસપ્તવિભઙ્ગિ ॥ ૪॥

ગ્રાહ્યગ્રાહકભાવવિશુદ્ધે પાદકરાઙ્ગુલિજાલપિનદ્ધે ।
આયતપાર્શ્વાઙ્ગુલિકરચરણે ધ્વસ્તવ્યાધિજરાજનિમરણે ॥ ૫॥

ઉદ્ગતરેણુરૂર્ધ્વગતરોમા વજ્રયોગવિવૃતામૃતધામા ।
બાલમરીચિવિલોકનરક્તે જગતાં દુઃખનિરાકૃતિશક્તે ॥ ૬॥

સુભ્રુ તનૂદરિ મધ્યકૃશાઙ્ગિ કર્ણાન્તાયતલોચનભૃઙ્ગિ(ભઙ્ગિ) ।
ડાકિન્યે (વ હિ) વિશ્વમશેષં લોકો વેત્તિ ન તે બહુવેષમ્ ॥ ૭॥

યત્નમૃતે જગદર્થસમૃદ્ધિશ્ચિન્તિતમાત્રજનેપ્સિતસિદ્ધિઃ ।
મૂઢો વેત્તિ ન દુષ્કૃતકર્મ પ્રાવૃષીવ ન શિલાઙ્કુરજન્મ ॥ ૮॥

અન્ધ ઇવાર્કશશાઙ્કાદર્શી પાપજનો હ્યનુભાવસ્પર્શી ।
ચિન્તામણિમજ્ઞા ન વિદન્તિ પ્રજ્ઞે ત્વસ્ય ફલાનિ ફલન્તિ ॥ ૯॥

ચક્રાઙ્કિતકરપાદમનોજ્ઞે જ્ઞાનાનલભસ્મીકૃતસઙ્ગે ।
કાયવચનમનસા કૃતદુરિતં રાગદ્વેષમોહપરિકરિ(લિ)તમ્ ॥ ૧૦॥

તદ્દિશામિ તવ દેવિ સમક્ષં યાવદ્યામિ ન દુર્ગતિપક્ષમ્ ।

મનઃ પરમાર્થં તનુસ્તવ વેદી સ ભવતિ નૈવ દુરિતપરિખેદી ॥ ૧૧॥

લક્ષણનિખિલાલક્ષિતગાત્રે સકલાનુવ્યઞ્જનગતપાત્રે ।
નવયૌવનમદમન્થરપિણ્ડે ચલકુણ્ડલયુગમણ્ડિતગણ્ડે ॥ ૧૨॥

તુઙ્ગનિતમ્બઘનસ્તનભારે ગલકાલમ્બિનિરંશુક(ક્રુશ)હારે ।
સંવરમધુપવિચુમ્બિમુખાબ્જે તદ્ભુજયુગપરિરબ્ધહૃદબ્જે ॥ ૧૩॥

નિર્ભરસુરતસુખાવિકલાક્ષિ મુક્તશિરોરુહવસનનિરપેક્ષે ।
હેરુકરાહુદષ્ટમુખચન્દ્રે સસ્મિતરચિત હૂં હૂં કૃતમન્ત્રે ॥ ૧૪॥

પતિમૌલિસ્થિતવિધુમમૃષન્તી કિમુ ચન્દ્રાર્કૌ વપુ(ર)મુષન્તી ।
માતસ્તે જગદનુપમરૂપં તદ્વિચારય પરમાર્થ સ(સ્વ)રૂપમ્ ॥ ૧૫॥

ક્લેશદાહિં(હ)શમનામૃતવચનં તદ્વિનેયજનશુદ્ધિવિરચનમ્ ।
પદ્મિનીતિ નલિનામલગન્ધઃ કરુણાપરજગદર્થનિબન્ધઃ ॥ ૧૬॥

દિવ્યસુધાધર(ગત)રસપાનં તજ્જગદદ્વયબોધિનિધાનમ્ ।
પ્રત્યઙ્ગસ્પર્શોઽપ્યનિમિત્તં સહજામ્બુધિવિપ્લાવિતચિત્તમ્ ॥ ૧૭॥

કિં ત્વં માતઃ કરિષ્યસિ તાભિઃ ષટ્ત્રિંશચ્છતકોટ્યબલાભિઃ ।
યદ્યન્યાં મનુતે બહુતાતસ્તદ્વિહાય ઝગિતિ દેહિ નુ માતઃ ॥ ૧૮॥

નાડીચક્રનિરોધ ————- મહાસુખસંવર ।
દેવિ ત્વં શતભાવવિકલ્પા શૂન્યસમાધિરપાકૃતતુલ્યા (તલ્પા) ॥ ૧૯॥

શૂન્યકૃપે સહજાદ્વયમુક્તં વજાય(જયા)નમિદમવધિ(વિ)ભક્તમ્ ।
ભાવાભાવસમસ્તાકાશવ્યાપી ભવતિ સ તત્ત્વવિકાશઃ ॥ ૨૦॥

ઉદ્ભવન્તિ તત એવ વિમોક્ષા બોધિપક્ષનિખિલપ્રતિપક્ષાઃ ।
બુધ્દાનામાવેણિકધર્માઃ સત્ત્વરાશિપરિપાચિતકર્માઃ ॥ ૨૧॥

યદ્વા યાનત્રયનિર્યાણં ધૂમાદિકમપિ ચાપરિમાણમ્ ।
ત્વદ્ભક્ત્યા યદલમ્ભિ શુભં મે ભવતુ મનો ભવતીપરમં મે ।
સકલકલુષરહિતં ગુણસિન્ધુસ્ત્વત્પરમં હ્યત એવ ન બન્ધુઃ ॥ ૨૨॥

ગુહ્યસમયસાધનતન્ત્રે શ્રીવજ્રવિલાસિનીસ્તોત્રં સમ્પૂર્ણમ્ ।

ઇતિ મહાપણ્ડિતવિભૂતિચન્દ્રપાદકૃતં વજ્રવિલાસિનીસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Vajravilasini Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*